॥४८॥ नकुलः सहदेवश्च युयुधानो धनंजयः॥ भगवान्देवकीपुत्रो ये चान्ये याश्च योषितः॥४९॥ तत्राहा
मर्षितो भीमस्तस्य श्रेयान्वधः स्मृतः॥ न भर्तुर्नात्मनश्चार्थे योऽहन्सुप्तान्शिशून्वृथा॥ ॥५०॥ ॥निशम्य भी
मगादितं द्रौपद्याश्च चतुर्भुजः॥ आलोक्य वदनं सख्युरिदमाह हसन्निव॥ ॥५१॥ ॥

तस्य तथाविधस्य द्रोणेर्वध एव श्रेष्ठः अन्यथा तस्य नरकपात प्रसंगात् तदाह। न भर्तुरिति॥ अहन् जघान। चतुर्भुजो कृष्णः
तावत् भीमेन हंतुं प्रवृत्ते द्रौपद्या च सहमाता तन्निवारणे प्रवृत्ताया मुत्तयोः संवारणाय। विष्कृतचतुर्भुज इति सन्दि
हानस्य सख्युरर्जुनस्य॥ ॥५१॥

ना.प्र.

वधार्हणः वधार्हः मयैव शास्त्रकृता ब्राह्मणो न हंतव्यः तथा॥ आततायिनमायांतमपि वेदांतपारगं॥ जिघांसंतं जिघांसीयान्न तेन ब्रह्महा भवेदिति वदता॥ तदुभयमप्यनुशासनं परिपालय। तच्च प्रतिज्ञां पूरयेत्याह॥ प्रियां सांत्वयता त्वया यत्प्रतिश्रुतं हननेन तत्सत्यं कुरु॥ मह्यं मम॥ तच्च वधे भीमस्य प्रियं भवति अवधे द्रौपद्याः ह्रिये श्रीकृष्णस्य हार्दं अभिप्रायं आज्ञाय

श्रीभगवानुवाच॥ ब्रह्मबंधुर्न हंतव्यः आततायी वधार्हणः॥ मयैवोभयमाम्नातं परिपाह्यनुशासनं॥ ५२॥
कुरु प्रतिश्रुतं सत्यं यत्तत्सांत्वयता प्रियां॥ प्रियं च भीमसेनस्य पांचाल्या मह्यमेव च॥ ५३॥ सूत उवाच॥ अर्जुनः
सहसाज्ञाय हरेर्हार्दमथासिना॥ मणिं जहार मूर्धन्यं द्विजस्य सहमूर्द्धजं॥ ५४॥ विमुच्य रसनाबद्धं
बालहत्याहतप्रभं॥ तेजसा मणिना हीनं शिबिरान्निरयापयत्॥ ५५॥ वपनं द्रविणादानं स्थानान्निर्या-
३२ पणं तथा॥ एष हि ब्रह्मबंधूनां वधो नान्योऽस्ति दैहिकः॥ ५६॥ पुत्रशोकातुराः सर्वे पांडवाः सह कृष्णया॥ ३२
स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकं॥ ५७॥ इति श्रीभागवते प्रथमस्कंधे सप्तमोऽध्यायः॥ ७॥ अश्वत्थामनिग्रहो नाम सप्तमः

शाखानरस्य शाक्यमुत्तयं विदध्यात्॥ अतो यमभिप्रायमिति ज्ञात्वेत्यर्थः॥ असिना खड्गेन मूर्धन्यं मूर्धनि जातं सह मूर्द्धजैः
सकेशं॥ १॥ मणिना च हीनं निर्यापयत् निःसारितवान्॥ अनेन श्रीकृष्णोक्तं सर्वं संपादितमित्याह॥ वपनमिति॥ निर्ह-
रणं दाहार्थं नयनं॥ इति प्रथमे सप्तमः॥ ॥ दैहिकः देहसंबंधी हस्तपादादिच्छेदलक्षणः ४

अष्टमेकुपितंद्रोणेरस्त्राद्त्रापरीक्षितः ॥ श्रीकृष्णेन स्तुतिः कुंत्या राज्ञः शोकश्च कीर्त्यते ॥१॥ ते पांडवाः संपरेतानां मृतानां गं
गायामुदकं दातुं ॥ सकृष्णाः श्रीकृष्णेन सहिताः स्त्रियः पुरस्कृत्य अग्रतः कृत्वा ॥ तस्मिन्कार्ये स्त्रीपुरःसरत्वविधि
नात् ॥ निनीय दत्वा हरिपादाब्जरजोभिः पूतायाः सरितः गंगायाः तस्याः जले ॥ पुनर्ग्रहणात् आप्लावे पि स्नाता इति गम्यते ॥२
कुरुपतिं युधिष्ठिरं सहानुजं भीमादिभिः सहितं ॥ मुनिभिः सहितः ॥ कितवैर्धूर्तैर्दुर्योधनादिभिः ॥ उच्छेद्य
२ ४ सहितः सांत्वयामास किं कुर्वन् भूतेषु

श्रीसूत उवाच ॥ अथ ते संपरेतानां स्वानामुदकमिछतां ॥ दातुं सकृष्णा गंगायां पुरस्कृत्य ययुः स्त्रियः ॥
१॥ ते निनीयोदकं सर्वे विलप्य च भृशं पुनः ॥ आप्लुता हरिपादाब्जरजःपूतसरिज्जले ॥२॥ तत्रासीनं कुरुपतिं धृतराष्ट्रं
सहानुजं ॥ गांधारीं पुत्रशोकार्तां पृथां कृष्णां च माधवः ॥३॥ सांत्वयामास मुनिभिर्हतबंधून्शुचार्पितान् ॥ भूतेषु कालस्य
गतिं दर्शयन्नप्रतिक्रियां ॥४॥ साधयित्वाजातशत्रोः स्वराज्यं कितवैर्हृतं ॥ घातयित्वासतो राज्ञः कचस्पर्शक्षतायुषः ॥५॥ याज
यित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः ॥ तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ॥६॥ आमंत्र्य पांडुपुत्रांश्च शैनेयोद्धवसं
युतः ॥ द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः ॥७॥ गंतुं कृतमतिर्ब्रह्मन्द्वारकां रथमास्थितः ॥ उपलेभेभिधावंतीं
मुत्तरां भयविह्वलां ॥८॥ ॥ [illegible] ॥ पुरंदरसदृशा [illegible] शतमन्योरिव ॥ निवृत्तिमिति [illegible]
कचग्रहणादिना क्षतं नष्टमायुर्येषां तान् ॥ याजयित्वेत्यादिना विकथा संक्षेपः ॥ शतमन्योः शतक्रतोरिव ॥ सैनेयः [illegible]
उद्धवेन संयुतः रथमास्थितः सन् उत्तरां परीक्षिन्मातरं अभिमुखं धावंतीं उपलेभे ददर्श ॥ ॥ सप्तायनमठ ॥ रामायनमठ ॥ ॥
[illegible] वित्रद ॥ शास्त्रं च यस्य शासन [illegible] रावण कालवश छिन्न ॥ येपि शोषां तु शक्तो समुद्र [illegible]
[illegible] प्रविष्टा [illegible] ॥ एवं कालगतिं बुद्धा [illegible]

श्री ग

उत्तराभीतास्सती प्रार्थयते पाहि पाहीति द्वाभ्यां अन्यस्मात्प्रार्थनायोग्यत्वाभावमाह । ततश्चेतः अन्यं अभयं अभयं प्रदातारं न पश्यामि । यत्र लोके पर
२२ स्परं मृत्युर्भवति ॥ तत्र भक्तानां येन मामेव दयति । अभिद्रवति अभिमुखमायाति तप्तमायसं लोहमयं शल्यं यस्य सः । अतिकार्पण्यमाह
काममिति । कामं यथेष्टं मां दहतु मे गर्भो मा निपात्यतां पात्यतां परालवस्मा इति कुपितस्य द्रौणेः अपाण्डवं पाण्डवरहितं इदं विश्वं कर्तुं प्रयुक्तं ब्रह्मास्त्रमबुध्य
त ॥ अत एव वक्तुमुखं तदागतमित्याह तर्ह्येवाथ ब्रह्मास्त्रस्याघ्रातैरेव निवर्त्यत्वात् तद्दुःपरिहरं व्यसनं वीक्ष्य । अनन्यविषय आत्मा येषां
११

पाहि पाहि महायोगिन्देवदेव जगत्पते ॥ नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परं ॥९॥ अभिद्रवति मामीश शरस्तप्तायसो
विभो ॥ कामं दहतु मां नाथ मा मे गर्भो निपात्यतां ॥१०॥ सूत उवाच ॥ उपधार्य वचस्तस्याः भगवान्भक्तवत्सलः ॥ अपांडवमि
दं कर्तुं द्रौणेरस्त्रमबुध्यत ॥११॥ तर्ह्येवाथ मुनिश्रेष्ठ पांडवाः पंचसायकान् ॥ आत्मनोभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाद
दुः ॥१२॥ व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनां ॥ सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः ॥१३॥ अंतस्थः सर्वभूता
नामात्मा योगेश्वरो हरिः ॥ स्वमायया वृणोद्गर्भं वैराट्याः कुरुतंतवे ॥१४॥ यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियं ॥ वैष्ण २३
वं तेज आसाद्य समशाम्यद्भृगूद्वह ॥१५॥ मा मंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमये च्युते ॥ य इदं मायया देव्या सृजत्यवति हंत्य
जः ॥१६॥

घा:२

स्वैकनिष्ठानामित्यर्थः ॥१३॥ वैराट्याः उत्तरायाः अंतस्थः सन् गर्भमावृतवान् । तत्र हेतुः यत आत्मा अंतर्यामी योगेश्वर इति विद्धि स्वस्यापि स्वे भाष
ष्टनार्थमुक्तं कुरूणां तंतवे संतानाय पांडवानामपि कुरुवंशजत्वादेवमुक्तौ ॥ अमोघं अप्रतिक्रियं च समशाम्यत् ॥ संशांतमासीत् ॥१५॥ एतत
ब्रह्मास्त्रशमनं आश्चर्यं मा मंस्थाः न मन्यस्व ॥१६

नटवत्॥ अथवा माया यवनिकाछन्नं तत्राधोक्षजमव्ययं ज्ञातपाठामूढादृक् कपाना यस्यः सामूढदृकतया मत्पया न लक्ष्यसे नवान्य कथं मतया मया। माया एव यवनिका तया छन्नमामतिवुद्धिर्यस्याः सा तया॥

द्रौपद्या १५ मत्वादि कृष्णा २

सह कृष्णया मद्दौ त्वा आद्यं त्वां नमस्ये नमस्करोमि। ननु कथं इत्थं मां कथं नमस्करोषि। तत्राह। आद्यं पुरुषं। कुतः प्रकृतेः परं तु कुतः ईश्वरं प्रकृतेरपि नियंतारं। भूत एव सर्वभूतानामंतर्बहिश्च पूर्ण वेनावस्थितं॥ तथाप्य लक्ष्यं तत्र हेतुमाह। माया एव जवनिका तिरस्करिणी तया आछन्नं। अतो हमज्ञा भक्तियोगाज्ञानप्रिज्ञा केवलं नमस्यामि। अधः अक्षजं ज्ञानं यस्मात्तमधोक्षजं। अव्ययं। अपरिच्छिन्नं तत्प्रपंचयति मूढदृशा दृष्टा सिमानिनां पुंसामा न लक्ष्यसे नु किंच। परमहंसानामात्मानात्मविवेकिनां ततो मुनीनां मननशीलानामपि तत्राप्यमलात्मनां निवृत्तरागादीनामपि तया तेन निजमहिम्ना।

ब्रह्मतेजोविनिर्मुक्तैरात्मजैः सह कृष्णया। प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती॥१५॥ श्रीकुंत्युवाच। नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परं॥ अलक्ष्यं सर्वभूतानामंतर्बहिरवस्थितं॥१६॥ मायाजवनिकाछन्नमज्ञाधोक्षजमव्ययं॥ न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा॥१७॥ तथा परमहंसानां मुनीनाममलात्मनां॥ भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः॥१८॥ कृष्णाय वासुदेवाय देवकीनंदनाय च॥ नंदगोपकुमाराय गोविंदाय नमो नमः॥१९॥ नमः पंकजनाभाय नमः पंकजमालिने॥ नमः पंकजनेत्राय नमस्ते पंकजांघ्रये॥२०॥ ॥ ॥ ॥ ॥ ॥

जातं त्वा

न लक्ष्यसे। अतो भक्तियोगं विधातुं त्वां वयं स्त्रियः कथं पश्येम॥ यद्वा परमहंसानामपि भक्तियोगविधानार्थं वा आत्मारामाणामपि अचिंत्यनिजगुणैराकृष्य भक्तियोगं कारयितुं मवतीर्णमित्यर्थः॥ ज्ञानलक्षणा अशक्या च मुच्छा पुनः केवलं नमस्करोति। श्रीकृष्णायेति द्वाभ्यां। पंकजं नाभौ यस्य। पंकजानां माला अस्यास्ति यस्य पंकजवत्सम्यन्नेत्रे यस्य। पंकजांकितावंघ्री यस्य तस्मै॥ ॥२॥

२८

तद्धतोपकारानानुस्मरति। यथेति द्वाभ्यां अयमर्थः। मा त्वितोपि मय्यधिका त्वत्प्रीतिं तथाहि। हृषीकेश यथा देवकी कंसेन रुद्धा त्वया विमोचिता च पुनः

वत थैव किं मो चितेति का का महानु विशेषः तत्र कंसं तद्दर्शयति। माऽत्रैति चिरं रुद्धा मृती। तस्मा देवं त्वं हि मोचितात थात्वस्मै चापितात स्मृती

त्वत्तस्याः पुत्रा राक्षिताः। अस्ति चान्यो नाथस्तस्याः। अहं तु विपद्गणा त्वत अपि मुहुः शीघ्रं च मात्मजा च त्वयैव च नाथे नेति। विपद्गणमेव दर्शयन्

ति। विषात्त तीमस्य विषमोदकदानात्॥ महाग्नेः जतुगृहदाहात्॥ पुरुषादा हिडिंबादयो राक्षसास्तेषां दर्शनात्। असत्सभायाः द्यूतस्थानात्

स्ता।

यथा हृषीकेश खलेन देवकी कंसेन रुद्धाति चिरं शुचार्पिता॥ विमोचिताहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणा

त्॥ २१ ॥ विषान्महाग्नेः पुरुषाददर्शनादसत्सभाया वनवासकृच्छ्रतः॥ मृधे मृधेऽनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चा

स्म हरेऽभिरक्षिताः॥ २२ ॥ विपदः संतु नः शश्वत्तत्र तत्र जगद्गुरो॥ भवतो दर्शनं यत्स्यादपुनर्भवदर्शनं॥ २३ ॥ जन्मै

श्वर्यश्रुतश्रीभिरेधमानमदः पुमान्॥ नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरं॥ २४ ॥ नमोऽकिंचनवित्ताय निवृ

त्तगुणवृत्तये॥ आत्मारामाय शांताय कैवल्यपतये नमः॥ २५ ॥ अथवा अपुनर्भवदर्शनं। अपुनर्भवः मो दर्श २४

शं प्रतीत्य पुनर्भवदर्शनस्य ते नं तु संपत्स्यते वपर मे श्वर दर्श

धतिरक्षिताः। आस्मच्छुलवाचे। यदा स्तु विपत्सु की दृशं दर्शनं। नास्ति पुनरपि भवदर्शनं यस्मात्तत्संपदसत्यपरः परिपाथित्यहस्ता नं यु स्माने स्व

ह। जन्म सत्कुले। जन्मादिभिरेधमानो मदो यस्य सः। अभिधातुं श्रीकृष्ण गोविंदेति वक्तुमपि। अकिंचनानां गोचरं विषयस्ततं यस्मात् स्त्रविनवाल

मनोरथं स्मरणाय अणमतिनमो इति। अकिंचनास्तेषामेव वित्तं सर्वस्वं [illegible] तस्मै तत् किं। निवृत्ता गुणवृत्तयो धर्मार्थकामविषया य तकिं विपत्स

स्मात्तस्मै। कुतः आत्मारामाय तत्कुतः शांताय रागादिरहिताय किं च कैवल्यपतये कैवल्यं दातुं समर्थाय॥ ॥ कृष्णायनमः ॥ ॥ २५ पतितन्नार

मन्येति। २५

भा° त्र

स्वा° २५
ततमनुकंपवाक्यमाकर्ण्य पुरुषस्वभावेन विहितान्तरजातिसाधारणान्वर्णयामासेति तृतीयेनान्वयः। यथावर्णं वर्णधर्मान् यथाश्र-
मं आश्रमधर्मांश्च वैराग्यरागाभ्यामुपाधिभ्यां क्रमेणाम्नातं उभयं निवृत्तिप्रवृत्तिरूपलक्षणं येषां तान् ॥ पुनस्तत्रैव विशेषमाह
दानेति। मोक्षधर्मान् शमदमादीन् भगवद्धर्मान् हरितोषणान् द्वादशपादिनियमरूपान् समासव्यासाभ्यां संक्षेपविस्तारौ तावे-

स्ततउवाच ॥ युधिष्ठिरस्तदाकर्ण्य शयानं शरपंजरे ॥ अपृच्छद्विविधान् धर्मान् ऋषीणामनुशृण्वतां ॥ २५ ॥ पुरुष-
स्वभावविहितान्यथावर्णं यथाश्रमं ॥ वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् ॥ २६ ॥ दानधर्मान् राजधर्मान्मो-
क्षधर्मान् विभागशः ॥ स्त्रीधर्मान् भगवद्धर्मान् समासव्यासयोगतः ॥ २७ ॥ धर्मार्थकाममोक्षांश्च सहोपायान्य-
२९ थामुने ॥ नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् ॥ २८ ॥ धर्मान् प्रवदतस्तस्य स कालः प्रत्युपस्थितः ॥ यो यो-
श्लो गिनश्छंदमृत्योर्वाञ्छितस्तूत्तरायणः ॥ २९ ॥ तदोपसंहृत्य गिरः सहस्रणीर्विमुक्तसंगं मन आदिपूरुषे ॥ ३९
कृष्णे लसत्पीतपटे चतुर्भुजे पुरः स्थितेमीलितदृग्व्यधारयत् ॥ ३० ॥

वयोगपोउपायैर्तैस्तत्पां धर्मादीश्च यथाप्रकारं प्रतिनियतोपाययसहितान्यथाययथावत् ॥ नानाख्यानेषु येइतिहासास्तेषु
यथास्थिततथावर्णयामास ॥ छंदेनेच्छया मृत्युर्यस्य ॥ सहस्रणीः युद्धसमीपस्थान् सहस्रैः रथिनां नयतिपालयतीति सहस्र-
णीः नीषक: ॥ सहस्रिणीरिति पाठो सहस्रार्थवती गिरः ॥ लसंतौपीतौपटौ यस्य तस्मिन् मीलिताक्षिगेवमनोव्यवधा-
रयत् ॥ ३ ॥

तदुपपादयति॥ अस्येति॥ अनुभावं प्रभावं वमज्ञानाद्यमेवं मन्यसे॥ मातुलेयं मातुलेय्याः देवक्याः सुतं प्रियं प्रीतिविषयं मित्रं प्रीतिकर्तारं
सुहृत्तमं सुपकारानपेक्षोपकारकं च॥ सौहृदात् विश्वासात् सारथिं अकरोः कृतवानसि॥ सचिवं मंत्रिणं च॥ ॥ नन्वीश्वरस्य कथं
वैषम्यमत्याद्दोषकृत्तस्तत्राह॥ सर्वेति॥ तत्कृतं नीचोच्चकर्म कृतं मम योग्यमयोग्यमिति मतेर्वैषम्यं कदाचिदपि नास्ति॥ कुतः निरवद्यस्य
रागादिशून्यस्य॥ तत्कुतः अनहंकृतेः तत्र कुतः अद्वयस्य तदपि कुतः समदृशः तत्रापि हेतुः सर्वस्यात्मनः यथेष्टं वा हेतुम हेतु

अस्यानुभावं भगवान्वेद गुह्यतमं शिवः॥ देवर्षिर्नारदः साक्षाद्भगवान्कपिलो नृप॥१९॥ यं मन्यसे मातुलेयं प्रियं मि
त्रं सुहृत्तमं॥ अकरोः सचिवं दूतं सौहृदादथ सारथिं॥२०॥ सर्वात्मनः समदृशो ह्यद्वयस्यानहंकृतेः॥ तत्कृतं मतिवै
षम्यं निरवद्यस्य न क्वचित्॥२१॥ तथाप्येकांतभक्तेषु पश्य भूपानुकंपितं॥ यन्मेऽसूंस्त्यजतः साक्षात्कृष्णो दर्शन
मागतः॥२२॥ भक्त्यावेश्य मनो यस्मिन्वाचा यन्नाम कीर्त्तयन्॥ त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः॥२३॥ स
देवदेवो भगवान्प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहं॥ प्रसन्नहासारुणलोचनोल्लसन्मुखांबुजो ध्यानपथश्चतुर्भु
जः॥२४॥

२१ यतो१
ज्ञावः॥ तथापि मम चेदपि हे नृप॥ अनुकंपितं अनुकंपां येन प्राणान् त्यजतः साक्षात् स्वयमेव न त्विंद्रादिरूपेण ... नीदेहत्यागपर्यंतं श्री
कृष्णावस्थानं प्रार्थयते॥ सदेवेति द्वाभ्यां॥ यावदिति विलंबं द्योतयति॥ अहं हिनोमि त्यजामीति स्वातंत्र्यमुद्दिष्टमित्युक्तं चेन्नहि
तं॥ प्रसन्नहासेन अरुणलोचनाभ्यां उल्लसत् अतिरुचिरं मुखांबुजं यस्य॥ ध्यानस्य पंथा विषयः॥ यो ध्यानेषु चिंत्यते॥ केवलं से
यतः स्थितः सन् मां प्रतीक्षतामित्यर्थः॥ ॥२४॥

नंतुस्याव...स्तोत्र। परमफलरूपं श्रीकृष्णे रतिं प्रार्थयति

अनयैव सुबुद्ध्या धारणया हृतमसुत्वं यस्य स्मरः तस्य श्रीकृष्णस्य पद्मयोः पादपद्मे एव गतश्चासौ ध्वस्तमायस्य स्मरः। अतएव निवृत्तः सर्वेंद्रियवृ
त्तीनां विभ्रमः। विविधं भ्रमणं यस्मात् संजन्यं देहं तौ नीषमस्काति व्याख्याति परमफलरूपं श्रीकृष्णे रतिं प्रार्थयितुं प्रथमं स्वकृतमर्पयति॥
इति नानाधर्मादिउपायैर्मतिर्मनोधारणलक्षणा उपकल्पिता समर्पिता। कस्मै चतानां पुंगवश्रेष्ठे भगवति विलक्षणा निःकामा। अविद्वेषे भा
र्थः। विगतात्मना यस्मात् तस्मिन्। यमपेक्षान्यत्र महत्त्वं नास्तीत्यर्थः॥ तदेव परमैश्वर्यमाह॥ स्वसुखं स्वरूपं तु परमानंदः उपगत आसवत्त्व
वहा विविहितं नुकी डितु प्रकृतिमुपेषुषि स्त्रीकृतवति। न तु स्वरूपतिरोधानेन जीववत्पारतंत्र्यमित्यर्थः॥ विहर्तुमिच्छुक्रीडा प्रपंचयति॥ य

अवित...
नू कृष्ण...
रूपमाह यो
ति

विशुद्धया धारणया हतासुभस्तदीक्षयैवाशुगतायुधव्यथः॥ निवृत्तसर्वेंद्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृज
जनार्दनं॥ ३१॥ भीष्म उवाच॥ ॥ इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि॥ स्वसुखमुपगते
क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः॥ ३२॥ त्रिभुवनकमनं तमालवर्णं रविकरगौरवरांबरं दधाने। वपुरलककुल
वृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या॥ ३३॥

यतः प्रकृतेर्भवप्रवाहः सृष्टिपरंपरा भवति। इदानीं श्रीकृष्णमूर्त्तिं वर्णयन् रतिं प्रार्थयते। त्रिभुवनकमनं त्रिलोक्यामेकमेव यत्क
ने श्रीकृ... मनीयं तद्वपुर्दधाने रतिर्मेऽस्तु। तमालवल्लीलावर्णो यस्य तत्। प्रातःकालीनरवेः करा इव स्वतं एव गौरपीतवरांबरं निर्मलं वस्त्रं यस्मि
न तत्। अलककुलैः परिवृतमाननाब्जं यस्मिन् तत्॥ विजयसखे पार्थसारथौ अनवद्या अहैतुकी फलाभिसंधिरहिता रति
रस्तु॥ ३३

॥ ऽ
विजयसारथि त्वमेवानुवर्णयन्निति प्रार्थयते। क्षुधितुरगाणां खुररजस्कररजसा विधूम्राः धूसराश्चेते विष्वगितस्ततश्चलंतः कचाः
४ कुंतलाः तैर्लुलितं विकीर्णाश्रमवारिस्वेदविंदुरूपं तेनलंकृतं वा शल्यघातकेनालंकृतमास्यं यस्य तस्मिन् श्रीकृष्णे मम मात्मामवेक्ष्य रमतामि
त्यर्थः। पुनः किंभूते। मदीयैस्तीक्ष्णैर्निशितैः शरैः विलिख्यमानं त्वच्यस्य शरैरेव विलसत्कवचं यस्य तस्मिन् किंच सपदीति सेनयोरुभयोर्मध्ये
रथं स्थापयमेऽच्युत। यावदेतान्निरीक्षेहं योद्धुकामानवस्थितानिति। स्फुरर्जुनस्य वचो निशाम्य सपदि तत्क्षणमेव निजपरयोर्बलयोः
सैन्ययोर्मध्ये स्थिते पार्थस्य रथे रतिरस्तु तत्रास्थित्वा किं तस्य रथं दर्शयति। परस्य दुर्योधनस्य सैनिकानामायुरक्ष्णा कालदृष्ट्याहृतवति

क्षुधितुरगरजोविधूम्रविष्वक्चलुलितश्रमवार्यलंकृतास्ये॥ मम निशितशरैर्विलिख्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा॥३४॥ सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य॥ स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थ
सखे रतिर्ममास्तु॥३५॥ व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य दोषबुद्ध्या॥ कुमतिमहरदात्मविद्यया य ४०
श्चरणरतिः परमस्य मेऽस्तु॥३६॥
तस्य १

अस्मो भीष्मः अस्मो द्रोणः अस्मो कर्णः इति तत्र प्रदर्शनव्याजेन दृक्क्षेपवत्सर्वेषामायुराकृष्यार्जुनस्य जयं कृतवति न केवलमर्जुनस्य
सपत्नायुर्हरणेनैव जयमावहत् किंच विद्याहरणेनापीत्याह। व्यवहिता दूरे स्थिता या पृतना तस्या मुखमिव मुखं। अग्रे स्थितान्भी
ष्मादीन्निरीक्ष्येत्यर्थः। स्वजनवधाद्विमुखस्य निवृत्तस्य। तदुक्तं गीतासु। एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत्। विसृज्य
सशरं चापं शोकसंविग्नमानसः। इति कुमतिं अहं हंतेत्यादि कुबुद्धिं॥ ॥३६॥

इ इ मांस्तुष्यनाथविश्व्यते ॥ उदयस्तु सर्वलतनुबनतारेण प्रतिपदं वलत्कुचलंतीगोः इत्यीयस्मात् । तेनैव संरंभेण ५२

मम तु मद्भक्तस्य अनुग्रहं कृतवानित्याह द्वाभ्यां ॥ स्वनिगमं अशस्त्रग्रहणवादं साहाय्यमात्रं करिष्यामीत्येवंरूपां तां स्वप्रतिज्ञां हित्वा श्री
कृष्णः शस्त्रं ग्राहयिष्यामीत्येवंरूपां मत्प्रतिज्ञां ऋतं सत्यं यथा भवति तथा अधि अधिकां कर्तुं उपरि रथस्थ एव अवप्लुतः सन् तूर्णं अत्ययात् । चलि
मुखवृक्षवत् ॥ इभं हंतुं हरिः सिंह इव ॥ किंभूतः धृतरथचरणः चक्रं येन सः । तदा वेगेन पथि गतं पतितं उत्तरीयवस्त्रं यस्य सः मुकुंदो
ति मे गतिर्भवतु उत्तरेणान्वयः ॥ किंच यदात्मयात्रेदाक्ष्यमानस्य आततायिनो धन्विनो मम शितैस्तीक्ष्णैर्विशिखैर्हतः अतो विशीर्णं दंशनं विध्वस्त
कवचः । क्षतजेन रुधिरेण परिप्लुतः व्याप्तः अस्मद्बलात् वारयंतमर्जुनमप्यतिक्रम्य मद्वधार्थं अभिससार अभिजगाम ॥ एवं योलोक

याधः

स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः ॥ धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिव हंतुमिभं गतोत्तरीयः ॥
॥ ३७ ॥ शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे ॥ प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान्गतिर्मु
कुंदः ॥ ३८ ॥ विजयरथकुटुंब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये ॥ भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता
गताः स्वरूपं ॥ ३९ ॥ ॥

अतीतपक्षे अर्जुनपक्षपाती वलक्षितः । वस्तुतस्तु मामेवानुगृहीतवान् । यन्मद्बाणैर्जर्जरकवचः माभिधास्तु स भगवान्मे गतिर्भव
त्वित्यर्थः ॥ तदेवमन्यायैरपि ततः तच्छ्रियाम्यथ रूपे रतिं प्रार्थयते ॥ विजयोऽर्जुनः तस्य रथ एव कुटुंबं । अर्जुनस्य परिरक्षणीयो यस्य तस्मि
न् । आत्तं तोत्रं प्रतोदो येन तस्मिन् । धृता हयानां रश्मयः प्रग्रहा येन तस्मिन् । बीभत्सादिरूपं उत्पन्नकारं तावदपि र
श्मिशब्दादिभिः तच्छ्रिया तया सारथ्यश्रिया ईक्षणीये शोभमाने मुमूर्षोर्मर्तुमिच्छोः । नन्वन्यायवर्तिनि किमिति रतिः प्रार्थ्यते तत्र
आह । भगवति अविवेकेऽपि यं तदा इह कुरुक्षेत्रे हताः सर्वे यं निरीक्ष्य स्वरूपं तत्समानरूपं गताः प्राप्ता इति पश्यन्नाह ॥ कृष्णायनमः ॥ ॥
२९

सा॰प्र

स्तदीयैः२ यो।

४१ दिव्यदृश्यापश्यन्नाह। अत्र युद्धे धर्मेण युध्यमानाः तत्स्वरूपं प्रापुरित्येतन्न विचित्रं यतोऽस्मदादयोऽपि प्रापुरित्याह। ललितागतिश्च विला
सस्वरामादिभिं जुगुप्सादिभिः आत्मीयैर्वा कल्पितरूपैर्मानः स्वजायास्मांताः। अतउक्तदेनमदेनाध्म अतएव तदेकचित्तेच
ननतस्य कृतं कर्म गोवर्धनोद्धारणादिकं। अनुकृतवत्यो गोपवध्वः यस्य प्रकृतिं स्वरूपं। आगन्ते गमन्मकारलोपस्त्वार्षः किं
लग्नस्मिंद्दं। तस्मिन्नेरातिरास्तीति। प्रवेणिवान्वयः जगत्प्रयुता म नुस्मरणादि। मुनिगणैर्नृपवरैश्च संकुले व्याप्ते अंतःसदसि
सतामध्ये युधिष्ठिरस्य राज्ञः क्रतये येषां मुनिगणादीनां मोऽर्हणीयः। अहोऽग्रपमहोमहि मेत्येवमाश्चर्येण विलोकनीयः

ललितगति विलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः। कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिमगन्
न्किल यस्य गोपवध्वः॥ ४०॥ मुनिगणनृपवर्यसंकुलेऽन्तःसदसि युधिष्ठिरराजसूय एषां। अर्हणमुपपेद ईक्ष
णीयो मम दृशिगोचर एष आविरात्मा॥ ४१॥ तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानां॥
प्रतिदृशमिव नैकधार्कमेकं समधिगतोऽस्मि विधूतभेदमोहः॥ ४२॥ ॥

सन्नुउपपेदे प्राप। एष जगतामात्मा मम दृष्टिगोचरः। दृष्टिविषयः सन्नाविः प्रकटो वर्त्तते। अहो मेऽत्रापमितिलाभ इ ४१
सोऽहं कृतार्थोऽस्मीत्याह। तमिममहं सम्यगधिगतः प्राप्तोऽस्मि। सम्प्रकमाह। विधूतभेदमोहः तदर्थभेदस्योपाधि
कवमाह। आत्मकल्पितानां स्वयं निर्मितानां शरीरभाजां प्राणिनां हृदि धृतिहृदयं धिष्ठितं अकारलोपस्त्वार्षः पृथगने
कधा अनेकधा अधिष्ठानभेदादनेकध्यमानतामित्यर्थः। अत्र दृष्टांतः सर्वप्राणिनां दृशं दृशं प्रति एकमेवार्कमने
कधा प्रतीतमिवेति॥ ॥ ॥४२॥

१ कृ॰दि॰२

मनोवाक् दृष्टीनां वृत्तिभिः परमात्मनि श्रीकृष्णेंऽतरवदीनः श्वासोयस्य सः निश्चलेन निरूपाधौ संपद्यमानं मिलितं आज्ञाय आलस्यं देवे भोग
वेष्टवा दितारा ज्ञामध्य माधवश्वनुस्तयव। निर्हरणादीनि संस्कारादीनि संपकृपरेतस्य मुक्तस्यापीत्यर्थः। हताभाविद्र मात्रकंपित गुह्य ना वैदोक्तः
संस्तता ष्टुतपस्विनी संताषवती राज्ञा युधिष्ठिर ॥ इति प्रथमे नवमः ॥ दृश्या मे कृत कार्यस्य सुहृदिना पुरतो हरेश्चीभिः संस्तूयमानस्य
वर्ण्यते द्वारका गमनं ॥ राज्यं चकार सुखं तत्र पृच्छति हवेति। स्वस्य रिक्थ धनस्यार्थं तस्माद्यते तत्तथा ॥ यद्वा स्वरिक्थायस्य पृथ्वी मयाम
कथं

सूत उवाच ॥ कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः ॥ आत्मन्यात्मानमावेश्य सोंतः श्वास उपारमत ॥ ४३ ॥ संपद्यमानमाज्ञा
य भीष्मं ब्रह्मणि निष्कले ॥ सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ॥ ४४ ॥ तत्र दुंदुभयो नेदुर्देवमानववादिताः ॥ शशंसुः
साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः ॥ ४५ ॥ तस्य निर्हरणादीनि संपरेतस्य भार्गव ॥ युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितो भ
वत् ॥ ४६ ॥ तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः ॥ ततस्ते कृष्णहृदयाः स्वाश्रमान्प्रययुः पुनः ॥ ४७ ॥ ततो युधिष्ठि
रो गत्वा सहकृष्णो गजाह्वयं ॥ पितरं सांत्वयामास गांधारीं च तपस्विनीं ॥ ४८ ॥ पित्रा चानुमतो राजा वासुदेवानुमोदितः
चकार राज्यं धर्मेण पितृपैतामहं विभुः ॥ ४९ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे युधिष्ठिरराज्यप्रलंभो ना
म नवमोऽध्यायः ॥ श्रीशौनक उवाच ॥ हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः ॥ सहानुजैः प्र
त्यवरुद्धभोजनः कथं प्रवृत्तः किमकार्षीत्ततः ॥ १ ॥

येषां स्वतएव धनादिहरणादाततायिनः तान् हत्वा प्रत्यवरुद्धभोजनः वंधुवधदुःखेन संकुचितभोगः राज्यलाभेन प्राप्तभो
गो वा कथं राज्ये प्रवृत्तः प्रवृत्तो वा ततः किमकार्षीत् ॥ १ ॥

सा॰प्र

॥ हरिः श्रीकृष्णः कुरो॰ १ याजायेवाश्रम॰ . तावन्मा उ॰
ल्यकैः ॥ तद्यशः पावनं दिक्षु शतमन्युरिवातनोत् ॥ १

राज्ये प्रवृत्ते श्रीकृष्णस्य प्रीतिं पर्यालोच्य प्रवृत्त इत्याशयेनोत्तरमाह। वंशं कुरोः संरोहयित्वा परीक्षद्रक्षणेन संरोहं अंकु
रितं कृत्वा। कथंभूतं वंशदवाग्निनिर्हृतं वंश एव दवो वनं तस्मादुद्भूतः क्रोधरूपो ऽग्निस्तेन निर्हृतं दग्धं निजराज्ये निवेश्य पुत्र
हीनो ऽहं तु मुक्त्वा किमकार्षीदित्यस्योत्तरमाह। निशम्येति। प्रवृत्तं यद्विज्ञानं परमेश्वराधीनं जगन्न स्वतंत्रं स्वरूपमित्ये
वंभूतं तेन विधूतो विभ्रमो ऽहं कर्तेत्येवंलक्षणो मोहो यस्य सः। अनुजैरनुवर्तितः सेवितः सन् अजित आश्रयः कृष्ण एवाश्र
योयस्य सः। परिधिः समुद्रः तत्पर्यंतां गां पृथ्वीं पालयामास। तस्य राज्यमनुवर्णयति काममिति त्रिभिः महीसर्वकामदोग्ध्री

श्रीसूत उवाच॥ वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भवभावनो हरिः॥ निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीत
मना बभूव ह॥ २॥ निशम्य भीष्मोक्तमथाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः॥ शशास गामिंद्र इवाजिताश्रयः परि
ध्युपांतामनुजानुवर्तितः॥ ३॥ कामं ववर्ष पर्जन्यः सर्वकामदुघा मही॥ सिषिचुः स्म व्रजान् गावः पयसोधस्वतीर्मु कामस्तत्र
दा॥ ४॥ नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः॥ फलंत्योषधयः सर्वाः काममन्वृतु तस्य वै॥ ५॥ नाधयो व्याधयः क्ले ४२
शा दैवभूतात्महेतवः॥ अजातशत्रावभवन् जंतूनां राज्ञि कर्हिचित्॥ ६॥ उषित्वा हास्तिनपुरे मासान् कतिपयान् हरिः॥ सु
४२ हृदां च विशोकाय स्वसुश्च प्रियकाम्यया॥ ॥ ७॥ ७॥

वत्स व्रजान् गोष्ठानि ऊधस्वतीः ऊधस्वत्यः ऊधः क्षीराशयः स्थूलो येषां स्वपयः॥ सिषिचुः अस्रवन्॥ अन्वृतु ऋतावृतौ॥ ५
आधयो मनोव्यथा व्याधयो रोगाः क्लेशाः शीतोष्णादिकृताः॥ दैवं च भूतानि च आत्मा च हेतुर्येषां मधिदैविकादीनां जं
तूनां तत्क्वचित्॥ ६॥ इदानीं द्वारकागमनं निरूपयितुमाह। उषित्वेति। स्वसुः सुभद्रायाः॥ ७॥ तत्र प्रायणमथ॥ कृष्ण॥ कृष्ण॥

न्त्स्वंसृष्टेरादौप्रलयानंतरंचनिःप्रपंचावस्थानमुक्त्वासृष्टिप्रलययोर्मध्येसप्रपंचा[illegible]वस्थानमाहुः। सएवअअच्युतस्वरूपाप्रि
तिरेवप्रकृतिंअनुससारअधिष्ठितवान्। तुयःपुनःसृष्टि[illegible]लयप्रवाहस्यानादि[illegible]। कीदृशीं निजवीर्यचोदितांस्वकालश
क्तिप्रेरितां। स्वांशभूतानांजीवानांमायांमोहिनीं। अतएवसिसृक्षंतींस्रष्टुमिच्छंतीं। किमर्थमनुससार। अनामरूपेआत्मनि
जीवेरूपनामनीविधातुमिच्छन् उपाधिसृष्ट्याजीवानांभोगा[illegible]र्थंधर्मा[illegible]णि[illegible]विधातुंवेदान्कृतवानित्याहुः। शास्त्रकृदि
ति। अस्यदर्शनमतिदुर्लभमस्माभिर्लब्धमित्याहुः। सवेअयं[illegible]इत्यस्यरूपं[illegible]विवानिर्जितामातरिश्वाप्राणायैः। इन्द्रि

सएवभूयोनिजवीर्यचोदितांस्वजीवमायांप्रकृतिंसिसृक्षतीं। अनामरूपात्मनिरूपनामनीविधित्समानोनुस
सारशास्त्रकृत॥२२॥सवाअयंयत्पदमत्रसूरयोजितेंद्रियानिर्जितमातरिश्वनः॥पश्यंतिभक्त्युत्कलिताम
लात्मनानन्वेषसत्त्वंपरिमार्ष्टुमर्हति॥२३॥

मार्गंसूरयएवपश्यंतिकेनभक्त्याउत्कलितउत्कंठितोऽमलोयआत्माबुद्धिस्तेन। दृश्यतेत्वग्र्ययाबुद्ध्येतिश्रुतेः। बुद्धेर्वैम
ल्यस्याप्ययमेवहेतुरित्याहुः। ननुहेसखि। एषएवसत्त्वंबुद्धिंपरिमार्ष्टुंसम्यक्शोधयितुमर्हति। ननुयोगादयः इत्यर्थः।
यद्वानुअहोएषसत्त्वंअज्ञानंपरिमार्ष्टुंनाशयितुं[illegible]मनेननान्यत्[illegible]सर्वं[illegible]तु[illegible]तिर्येनेनसहवर्तितव्यमित्यर्थः॥॥॥ २२
कि।

[illegible] कुरु [illegible] गाध्यायः [illegible] तपोवन [illegible]

भा०म

उणपस्ते।कर्तामाङ्कुः हे सखियोवेदेषु रहस्यनिरूपकैः।अनुगीतस्यकथा[illegible]अनुगीतास्मत्पःकथायस्यसएवायं।ग
नप्रकारमाङ्कुः।यएकईशइत्यादि।एवंकृतस्यनानावतारकारणमाङ्कुः।य[illegible]दीति।तमोव्याप्ताधीर्येषांतेनृपाअधर्मेण
जीवंतिकेवलंप्राणान्बुभुक्षंतीतितत्रतदाएषएवसत्त्वायस्थितेःसत्त्वतःविभ्र[illegible]रूपाणिस्वेनन्नृपाणिदधत।भगादीनिधृत्वाप्र
४४ कटयति।युगेयुगेतदवसरे।भगंऐश्वर्यं।सत्यंसत्यप्रतिज्ञं।ऋतंयथार्थोपदेशकंचदयांकरुणांयशः।अद्भुतकर्मवीवि

सवाअयंसख्यनुगीतसत्कथोवेदेषुगुह्येषुचगुह्यवादिभिः॥यएकईशोजगदात्मलीलयासृजत्यवत्य
त्तिनतत्रसज्जते॥२४॥यदाह्यधर्मेणतमोधियोनृपाजीव[illegible]तत्रैषहिसत्त्वतःकिल॥धत्तेभगंसत्यमृतंदयां
यशोभवायरूपाणिदधद्युगेयुगे॥२५॥अहोबतस्व[illegible]तमंयदोःकुलंअहोअलंपुण्यतमंमधोर्वनं। ४४
यदेषपुंसामृषभःश्रियःपतिःस्वजन्मनाचंक्रमणेनचांचति॥२६॥ ॥ ॥

शो[illegible]पतःश्रीकृष्णावतारसौभाग्यंवर्णयंति।अहोइतिपंच[illegible]।[illegible]स्मात्।एषपुरुषोत्तमः।श्रियःपतिःस्वजन्मनाय
दोःकुलंचांचतिपूजयति।सत्करोति।अतःश्लाघ्यतमंकुलं॥चंक्र[illegible]णेनच।मधोर्वनंमथुरांसत्करोति।अतस्तत्पुण्य
तमम्इति।तमेवार्थंस्पष्टयंतातिशयेअलमिति[illegible]प्याद्यर्थेऽलङ्कृतौ॥ ॥श्रीगोविंदायनमः॥ ॥छ॥ ॥

वोषितं २८

अहोवतअत्याश्चर्यं किंतत्कुशस्थलीद्वारकापूर्वोक्ताकृष्टावइतिअधुनास्वस्यतिरस्करीपरितवकुंतोभुवश्चपुण्ययशःकर्त्रीसवतिाय
यतःयत्प्रजाःस्वानुग्रहेणइषितंप्रेषितंस्मितयुक्तावलोकंयद्वाअनुग्रहार्थमिषितंइच्छितंस्वपतिंआत्मनःपतिंश्रीकृष्णंतुपि
पादिवदेहमास्वपतिंनित्यंपश्यंतिस्मअहोभाग्यमितिअर्थः।उषितंप्रतिपाठेस्वानुग्रहार्थमुषितंकृतनिवासंतेनतद्गोष्ठीत्यर्थः॥ ४५
विअस्यगृहीतपाणिभिःपत्नीभिःईश्वरोयमेवजन्मांतरेष्वसमर्चितःयस्मिन्अधरामृतेयाआशयाश्चित्तंयासांताःसंमोहंप्राप्ताः

अहोवतस्वर्यशसस्तिरस्करीकुशस्थलीपुण्ययशस्करीभुवः॥पश्यंतिनित्यंयदनुग्रहेषितंस्मितावलोकंस्वपतिं
स्मयत्प्रजाः॥४५॥नूनंव्रतस्नानहुतादिनेश्वरःसमर्चितोह्यस्यगृहीतपाणिभिःपिबंतियाःसख्यधरामृतंमुहुर्व्रजस्त्रि
यःसंमुमुहुर्यदाशयाः॥४६॥यावीर्यशुल्केनहृताःस्वयंवरेप्रमथ्यचैद्यप्रमुखान्हिशुष्मिणः॥प्रद्युम्नसांबां
बसुतादयोपरायाश्चाहृताभौमवधेसहस्रशः॥४७॥एताःपरंस्त्रीत्वमपास्तपेशलंनिरस्तशौचंवतसाधुकुर्वते।
यासांगृहात्पुष्करलोचनःपतिःनजात्वपैत्याहृतिभिर्हृदिस्पृशन्॥४८॥

इतिमनोहरत्वमुक्तं।एतत्प्रपंचयइतिद्वाभ्यां॥वीर्यमेवशुल्कंमूल्यंतेनशुष्मिणःबलिष्ठान्।प्रद्युम्नसांबांबश्चांबस्य
सुतायासांरुक्मिणीजांबवतीनग्नजितीनांताःआदिर्यासांसत्यभामादीनांताःयाश्चअपराअस्यश्लोकस्याग्रस्थश्लोकेनान्वयः॥ ४७
एताःस्त्रीत्वमेवपरंकेवलंसाधुशोभनंकुर्वतेअपास्तपेशलंतदस्वातंत्र्यंयस्मात्तत्निरस्तंशौचंशुचित्वंयस्मात्तथाभूतमपि
जातुकदाचिदपिनापैतिनानिर्गच्छतिआहृतिभिर्व्याहारैःयद्वापारिजातादिदृष्टयवस्त्वाहरणैर्हृदिस्पृशन्आनंदयन्॥॥॥ ४८

वाक्यैः।

४९ ॥ मधुद्विषो पिरोपिध्याय स्त्रीणाय स्नेहात्परेसः शत्रुस्तृ शंकि
एवंविधा विचागिरः सस्मितेन निरीक्षणेनाभिनंदन् हरिर्ययौ ॥ मधुद्विषो पिरापिध्याय स्त्रीणायस्नेहात्परेसः शत्रुस्तृ शंकि ॥ पांडोः कुरुवंशजत्वात् ॥ पांड
तः मनुप्रसुक्ता ॥ हस्त्यश्वरथपादातं सेनाग सा चतुर्विधं मित्येवं चतुरंगिणी इत्तनाम्नेना ॥ पांडोः कुरुवंशजत्वात् ॥ मरु धन्विकद कोद
वाअपि कौरवाएवतान्नृपयेरुद्धवादिभिः सहकुरुरुजुकुरुदेशांतर्गतमेवक्रमात्र ननिवाछितः ॥ मरुर्निकदकोद
शःधन्वोल्यादकः आनर्त्ताख्यो द्वारकादेशः ॥ सविवुः उपागात्प्राप ॥ ५३ ॥ हतागर्वमनाक् ईषत आंतवाहायस्पस्पःत

एवंविधा वदंतीनां सगिरः पुरयोषितां ॥ निरीक्षणेनाभिनंदन् सस्मितेन ययौ हरिः ॥ ४९ ॥ अजातशत्रुः पृतनां
गोपीथाय मधुद्विषः ॥ परेभ्यः शंकितः स्नेहात्प्रायुंक्त चतुरंगिणीं ॥ ५० ॥ अथ दूरागतान् शौरिः कौरवा
न्विरहातुरान् ॥ संनिवर्त्य दृढं स्निग्धान्प्रायात्स्वनगरं प्रियैः ॥ ५१ ॥ कुरुजांगलपांचालान् शूरसेनान्
सयामुनान् ॥ ब्रह्मावर्त्तं कुरुक्षेत्रं मत्स्यान्सारस्वतानथ ॥ ५२ ॥ मरुधन्वमतिक्रम्य सौवीराभीरयोः प
रान् ॥ आनर्त्तान् भार्गवोपागाच्छ्रांतवाहो मनाग्विभुः ॥ ५३ ॥ तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हणः ॥ सायं भेजे
दिशं पश्चाद्गविष्ठो गां गतस्तदा ॥ ५४ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे दशमोऽध्यायः ॥ १० ॥
॥ श्री [illegible] ॥

तत्रतत्र तस्मिंस्तस्मिन् देशे तत्रत्यैर्जनैः प्रत्युद्यतानि निवेदितानि अर्हणानि उपायनानि यस्य सः सायं अपराह्णे पश्चादि
शं पश्चिमां दिशं भेजे प्राप्त ॥ तदा गविष्ठः स्वर्गस्थः सूर्यः गां उदकं गतः प्रविष्टः अस्तंगत इत्यर्थः ॥ अथवा एवम
तरु दत्यापः सायं प्रविशतीति श्रुतेः ॥ यद्वा तदा सायं कालेजातत्वात् अवतीर्य गां भूमौ स्थितः गोजलाशय गवि
मन पश्चाद्दिशं संध्यां भेजे उपासितवानित्यर्थः ॥ प्रथमे दशमः ॥ ॥ अध्याय जो वाक्यमतिविभ्रमादाय दत्त हीनं लिखि
तं मयाकृतं सर्वमार्यैः परिशोधनीयं कोपं न कार्यं लिखितं लेखक
स्य ॥

सदरशंखः दाध्मायमानः अतिशयेन भगवताध्मायमाणः उच्चकाशे शुशुभ इत्यर्थः। धवल मुदरं यस्य स धवल
कृमः कुलं तस्याधरशोणेन रागेण शोणिमा शोणिमाभावो यस्य सः। अधरशोणशोणिमा। स्वार्थे इमन्। कर कंजे कर कम
पुटे मध्यवर्तमानः। कथं शुशुभे। अब्जखंडे कैरवकमलसमूहे कलहंसो राजहंस उच्चैः शब्दं यथा टी० २

आनर्त्तैः स्वस्य मातस्य पुरीं निर्विश्य वंधुभिः। एकादशेरातिः स्मपकूर्यादवेडंस्यवृष्णंपतो॥१॥ उक्त्वा ... लतयोरमुदं वहुजतोरणे। उल्लसद्वनदीपा
निःस्वपुरं प्रभुराविशत। वृद्धान्स्वमृद्धानुद्दरवरं पांचजन्यशंखं दध्मो वादितवान् जगतोऽयं ... तस्पत्तयावहं॥ प्रत्युद्ययुः प्रत्युज्जग्मुः।
भर्तुर्दर्शनेलालस्माऽउत्सुकं यास्माताः। तत्र तस्मिन् श्रीकृष्णे उपनीताः समर्पिताः वलयः उपायनानि यास्तिः। निरपेक्षेपितस्मिन्नाद
रेणसमर्पणे दृष्टांतः रवेदीपमिवेति। पितरं मर्भका इव तं सर्वसुहृदमवितारम्। गुरुरितुद्दरणान्वयश्च सुहृच्चेनैवाविता रनतुका

श्रीसूत उवाच॥ आनर्त्तान्स उपाव्रज्य स्वृद्धान्जनपदान्स्वकान्॥ दध्मौ दरवरं तेषां विषादं शमयन्निव॥१॥ स उच्चकाशे धवलो
दरोदरोप्युरुक्रमस्याधरशोणशोणिमा॥ दाध्मायमानः करकंजसंपुटे यथाब्जखंडे कलहंस उत्स्वनः॥२॥ तमुपश्रुत्य निन
दं जगद्भयभयावहं॥ प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः॥३॥ तत्रोपनीतवलयो रवेर्दीपमिवादृताः॥ आत्मारा
मं पूर्णकामं निजलाभेन नित्यदा॥४॥ प्रीत्युत्फुल्लमुखाः प्रोचुः हर्षगद्गदया गिरा॥ पितरं सर्वसुहृदमवितारमिवार्भकाः॥
५॥ नताः स्म ते नाथ सदांघ्रिपंकजं विरिंचवैरिंच्यसुरेंद्रवंदितं परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत्परः प्रभुः॥६॥
भवाय नस्त्वं भव विश्वभावन त्वमेव माताथ सुहृत्पतिः पिता॥ त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो वभूवि
म॥७॥ ॥

मेनन्नत्र हेतुः आत्मारामं॥ तत्रापि हेतुः परमानंदं निजस्वरूपलाभेनैव पूर्णकामं॥ किमूचुरिति। नताः स्मेति। विरिंचो ब्रह्मा वैरिंच्याः
ऊत० २ सनकादयः इह संसारे परं क्षेममिच्छतां परायणं परेषां ब्रह्मादीनां प्रभुरपि कालो यत्र परः प्रभुर्न भवेत्॥ अतः भवाय उद्भवा
यनोऽस्माकं त्वं भव। हे विश्वभावन। कृतिनः कृतार्था वभूविम जाता वयं॥ ॥ कृष्णाय नमः॥ श्री ॥ ॥ ॥ ॥ छ॥ ॥

मूल॰ २४ पं॰ कथं व यं नाथ विरोधिते यमिप्रपन्नात्मलोरविलग्नापतोषणो जीवे मते सुदर्शसरासिनेम
ताञ्च नो हर॥१॥ टी॰ प्रपन्नानात्मलोमूपोयोरविलसोपसतस्यतोषणेनाशकं। वा प्रपन्नानात्मलो ऽसं भवा

कृतार्थत्वमेवाङ्कः॥ अहो इति। अहो लब्धवताद्यं समनाथास्मः॥ यद्यस्मात्त्वन्नपंपश्येम। त्रैविष्टपानामपि दुर्लभं दर्शनं यस्य देवानाम
पि दुर्लभमित्यर्थः॥ अस्मान् अयं स्मिततयुक्तं स्निग्धं निरीक्षणं यस्मिंस्तदाननं यस्मिंस्तद्रूपं॥ सर्वसौभाग्यभाजनं सौभगं यास्मि
न्॥ अनेकाइव सकरुणमाङ्कः॥ यर्हीति। यदा त्वं सुहृदां कार्यादेः नाथवानितिपाठे तु इत्सनाहरेषष्ठी॥ अस्मान्ननु हित्वा अपस्तस्मा
त्ज्ञ अपहाय गजगाम॥ कुरून् हास्तिनापुरं मधून् मथुरां च॥ तत्र तदा रविर्विनाक्ष्णामस्माकं क्षणः कोर्यथा एवं त्वं नः त्वदीयानामस्मा॥

अहो सनाथा भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनं॥ प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्व
सौभगं॥ ८ ॥ यर्ह्यम्बुजाक्षापससार भो भवान् कुरून् मधून्वाथ सुहृद्दिदृक्षया॥ तत्राब्दकोटिप्रतिमः क्षणो भ
वेद्रविं विनाक्ष्णोरिव नस्तवाच्युत॥ ९ ॥ इति चोदीरिता वाचः प्रजानां भक्तवत्सलः॥ शृण्वानोऽनुग्रहं दृष्ट्या
वितन्वन्प्राविशत्पुरीं॥ ११ ॥ मधुभोजदशार्हार्हकुकुरान्धकवृष्णिभिः॥ आत्मतुल्यबलैर्गुप्तां नागैर्भोग
वतीमिव॥ १२ ॥ सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः॥ उद्यानोपवनारामैर्वृतपद्माकरश्रियं॥ १२ ॥ ॥

४६
३४ न केवलं तव
दर्शनं अस्माकं मांध्यं।
किंतु जीवन
मपि दुर्लभ
मित्यङ्कः। क
धामिति।

कमपीत्यर्थः॥ इति चैवंविधा अन्याश्चोदीरिता वाचः शृण्वन्नुग्रहस्पर्शो नेन्द्रावलोकनेनानुग्रहं कुर्वन्॥ द्वारकां स्मो
तिपवलिः स्वतुल्यबलैर्मधुभोजादिभिर्गुप्तां रात्रि तां सर्वर्तुषु सर्वे विभवाः पुष्पादिसंपत्तयो येषां ते पुण्य ८६
वृक्षाः॥ लताश्च मालतामंडपाश्च येषु तैः उद्यानादिभिर्वृतायेपद्माकराः ते शोभितैः श्रीशोभा यस्यां तां॥ उद्या
नं फलप्रधानं पुष्पप्रधानं आरामः क्रीडार्थं वनं॥ १२॥

उपवनं

वृक्षांतर्वर्ति।

रवि

किंवक्ष्यतीतिशंकया।।अवहित्थक्रमेणपृच्छतिसूरइत्यादिना।।मारिषःमान्यमातामहो।।आनकदुंदुभिःवसुदेवः२७स्वसारःपर
स्परं।।वसुदेवस्त्रीमतं मामापिक्षेमंपृष्टमेवपृथगपिपृच्छति।।स्वयमिति।।आहुकःउग्रसेनःअसत्पुत्रोयस्य।।अतएव
जीवनमात्रमेवपृष्टंअनुजोदेवकस्य।।हृदीकसुतःकृतवर्माजयंतादयःकृष्णभ्रातरः।।२९ सर्ववृष्णीनांमध्येमहारथः३

सूरोमातामहःकच्चित्स्वस्त्यास्तेचाथमारिषः।।मातुलःसानुजःकच्चित्कुशल्यानकदुंदुभिः।।२८।।सप्तस्वसारस्तत्पत्न्योमातु
लान्यःसहात्मजाः।।आसतेसस्नुषाःक्षेमंदेवकीप्रमुखाःस्वयं।।कच्चिद्राजाहुकोजीवत्यसत्पुत्रोस्यचानुजः।।हृदी
कःससुतोऽक्रूरोजयंतगदसारणाः।।२९।।आसतेकुशलंकच्चिद्येचशत्रुजिदादयः।।कच्चिदास्तेसुखंरामोभगवा
न्सात्वतांप्रभुः।।३०।।प्रद्युम्नःसर्ववृष्णीनांसुखमास्तेमहारथः।।गंभीररयोऽनिरुद्धोवर्द्धतेभगवानुत।।३१।।सुषे था
णश्चारुदेष्णश्चसांबोजांबवतीसुतः।।अन्येचकार्ष्णिप्रवराःसपुत्राऋषभादयः।।३२।।तथैवानुचराःशौरेःश्रु
तदेवोद्धवादयः।।सुनंदनंदशीर्षण्यायेचान्येसात्वतर्षभाः।।३३।।अपिस्वस्त्यासतेसर्वेरामकृष्णभुजाश्रयाः।।अ
पिस्मरंतिकुशलमस्माकंबद्धसौहृदाः।।३४।।भगवानपिगोविंदोब्रह्मण्योभक्तवत्सलः।।कच्चित्पुरेसुधर्मायांसुख
मास्तेसुहृद्वृतः।।३५।।

गंभीररयः प्रद्युम्नमहावेगः वर्द्धतेमोदतइत्यर्थः।।३१ श्रीकृष्णस्यापत्यानिकार्ष्णयः।।तेषुप्रवराः३२ सुनंदनंदौशीर्षण्यौमुख्यौयेषांते३३ भगवान्
सुखमास्तइतिप्रश्नस्यानौचित्यमाशंक्याह।उरइत्यादि।।।। ३५

भगवतो ऽत्रावस्थानेहि लोकानां मंगलं नान्यथेत्याशयेनाह ॥ वृत्तित्रि ॥ मंगलायसुताय । क्षेमायलब्धपालनाय । भवायउद्भवा
य । अनंतसखः । बलभद्रसहायः ॥३६॥ अर्चिताः सर्वैर्न जिताः । परमानंदं यथा भवति महापौरुषिकाः वैकुंठनाथानुचराः ॥३७॥
यस्यपादशुश्रूषणमेवमुख्यं तपआदिभ्यः श्रेष्ठं यत्कर्म तेन सत्यभामादयः संख्ये युद्धेश्रीकृष्णबलेन निर्जित्य तदाशिषः देव
भोग्यान् पारिजातादीन् । वज्रायुधस्य वल्लभाशचीतस्याउचिताः ॥३८॥ यद्बाहुदंडप्रतापोपजीविनः सुधर्मामंघ्रिभिरधि

५८ मंगलायचलोकानां क्षेमायचभवायच ॥ आस्तेयदुकुलांभोधावाद्यो ऽनंतसखः पुमान् ॥३६॥ यद्बाहुदंडगु
प्तायां स्वपुर्यां यदवो ऽर्चिताः ॥ क्रीडंतिपरमानंदं महापौरुषिकाइव ॥३७॥ यत्पादशुश्रूषणमुख्यकर्मणा
सत्यादयो द्व्यष्टसहस्रयोषितः ॥ निर्जित्यसंख्येत्रिदशांस्तदाशिषोहरंतिवज्रायुधवल्लभोचिताः ॥३८॥
यद्बाहुदंडाभ्युदयानुजीविनोयदुप्रवीराह्यकुतोभयामुहुः ॥ अधिक्रमंत्यंघ्रिभिराहृतांबलात्सभांसु ५८
धर्मां सुरसत्तमोचितां ॥३९॥ कच्चित्तेनामयंतातभ्रष्टतेजाविभासिमे ॥ अलब्धमानो ऽवज्ञातः किंवातातचिरो
षितः ॥४०॥ ॥ ॥४०॥

कामं तस्मिन् गोविंदः सुखमास्तेइतिगतपंचमश्लोकेनान्वयः ॥३५॥ इदानींतस्यैवकुशलं पृच्छति । कच्चिदितिषड्भिः ॥ अ
नामयंआरोग्यं । नलब्धोमानोयेनबंधुभ्यः सकाशात् ॥ किंवातेऽश्रुतश्रवज्ञातः तिरस्कृतः । यतः चिरोषितः
बहुकालंतत्रस्थितः ॥ ॥४॥ ॥ ॥

अभावैरिति च्छेदः। अप्रेमभूतैरमंगलैः परुषैः शब्दादिभिः नाभिहतः न ताडितोऽसि किं ॥ यद्वा अर्थिभ्यः किमपि दास्यामीति तेभ्यो नादत्तं किं। यद्वा आश
यासद्य यथा आशा न वर्तेत तथा दास्यामीति प्रतिश्रुतं तस्मै न दत्तं किं ॥४१॥ कुतः विच्छायो निर्विगतकान्तिरसि। अन्यद्वा शरणागतं सत्त्वं प्राणि
मात्रं न त्यक्तवानसि किं। यतस्त्वं सर्वशरणप्रदः ॥ आश्रयप्रदः ॥४२॥ अगम्यामिति च्छेदः। निन्दितां स्त्रियं अगमः किं न गतवानसि। अ
सत्कृतां मलिनवस्त्रादिनाऽगमः किं नोत्तमैः समैर्वेत्यर्थः ॥ असमैरधमैर्वा किं न पराजितोऽसीत्यर्थः ॥४३॥ संभोज्यान् भोजनार्हान् वृद्धबाल

कच्चिन्नाभिहतोऽभावैः शब्दादिभिरमंगलैः ॥ न दत्तमुक्तमर्थिभ्य आशया यत्प्रतिश्रुतं ॥४१॥ कच्चित्त्वं ब्राह्मणं बालं गां
वृद्धं रोगिणं स्त्रियं ॥ शरणोपसृतं सत्त्वं नात्याक्षीः शरणप्रदः ॥४२॥ कच्चित्त्वं नागमोऽगम्यां गम्यां वाऽसत्कृतां स्त्रियं ॥ परा
जितो वाऽथ भवान्नोत्तमैर्नाधमैः पथि ॥४३॥ अपि स्वित्पर्यभुंक्थास्त्वं संभोज्यान् वृद्धबालकान्। जुगुप्सितं कर्म किंचित्कृ
तवान्न यदक्षमं ॥४४॥ कच्चित्प्रेष्ठतमेनाथ हृदयेनात्मबंधुना ॥ शून्योऽस्मि रहितो नित्यं मन्यसे तेऽन्यथा न रुक् ॥४५॥
इति श्रीभागवते महापुराणे प्रथमस्कंधे युधिष्ठिरदर्शनं नाम चतुर्दशोऽध्यायः ॥ ॥ ॥अर्जुनप्रत्यागमनं नाम॥

उपोस्पाति ष्ठिरत्वाध्य गर्जितपानु स्कंधकाः ३

बालकान् किंचित्तु पर्यभुंक्थास्त्यक्त्वा भुक्तवानसि ॥ अक्षमं कर्तुमयोग्यं यत् तन्न कृतवानसि किं ॥४४॥ नित्यं स्व
दा प्रेष्ठतमेन हृदयेनांतरंगेणात्मबंधुना श्रीकृष्णेन रहितः शून्योऽस्मीति मन्यसे तद्युक्तमर्थः। अन्यथा ते रुक् मनःपीडा
न घटते ॥ ॥४५॥ इति श्रीभागवते महापुराणे भावार्थदीपिकायां प्रथमस्कंधे चतुर्दशोऽध्यायः ॥ कृष्णाय नमः ॥

कलिप्रवेशमालक्ष्य धुर्यं नयस्य परीक्षितिः ॥ आरोहन्न्रपः स्वर्गमिति पद्वदत्तो ब्रवीत ॥१॥ कृष्णोऽर्जुनः आविकल्पित इति छेदः ॥
नानाशंकास्पदं रूपमालक्ष्य विकल्पित इत्यर्थः ॥ प्रतिभाषितुं न शशाकेति हेतुमुत्तरेणान्वयः । तत्र हेतवः ॥ कृष्णविश्लेषेण कर्षितः
कृशः कृतः ॥१॥ शोकेन हेतुना वदनं च हृत्सरोजं च वदनहृत्सरोजे शुष्यती वदनहृत्सरोजे यस्य ॥ हता प्रभा तेजो यस्य ॥२॥ शुचः शोकाश्रूणि
यानि संस्तभ्य तिरोधाय नेत्रयोर्वर्तमानस्य गलितानि च पाणिना आमृज्य परोक्षेण दर्शनागोचरेण श्रीकृष्णेन हेतुना समुन्नद्धं यत्प्रेमो
मोधिकं

श्रीसूत उवाच ॥ एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः ॥ नानाशंकास्पदं रूपं कृष्णविश्लेषकर्शितः ॥१॥ शोकेन
शुष्यद्वदनहृत्सरोजो हतप्रभः ॥ विभुं तमेवानुध्यायन्नाशक्नोत्प्रतिभाषितुं ॥२॥ कृच्छ्रेण संस्तभ्य शुचः पाणिना
मृज्य नेत्रयोः ॥ परोक्षेण समुन्नद्धप्रणयौत्कण्ठ्यकातरः ॥३॥ सख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन् ॥ नृप ५९
मग्रजमित्याह बाष्पगद्गदया गिरा ॥४॥ अर्जुन उवाच ॥ वंचितोऽहं महाराज हरिणा बंधुरूपिणा ॥ येन मेऽपहृ
तं तेजो देवविस्मापनं महत् ॥५॥ यस्य क्षणवियोगेन लोको ह्यप्रियदर्शनः ॥ उक्थेन रहितो ह्येष मृतकः प्रोच्य
ते यथा ॥६॥

कथं तेन कातरः व्याकुलः नृपमित्याहेत्युत्तरेणान्वयः ॥३॥ सख्यं हितैषितां मैत्रीं उपकारितां सौहृदं संबंधितां च बाष्पेण कंठबंध
नात् गद्गदया ॥४॥ येन मां वंचयता देवानपि विस्मापयति यत् ॥५॥ यस्य क्षणवियोगेनेत्यादि यच्छद्वान्तेनाहमपहृत इति
यस्य लोकस्य न तच्छद्वेन संबंधः ॥ प्रियस्याप्यहृष्ट यद्वेद्दृष्टं तत् ॥ उक्थेन प्राणेन एष पित्रादिः ॥६॥ तस्यायं न मम ॥ ॥छ॥ ॥ ॥

श्रीं श्लोकोपरान्ननुस्मरतीय मंश्रयादितिदर्शा ि॥ यस्मंश्रयात् बलात् ॥ स्मरेण कामेन दुर्मदानामतिमत्तानां तेजः प्रभावः हृतं धनुर्ग्रहणेनैव
पश्चात् च धनुः ग्रहणेनैव मज्जीकृतं च तेन मत्कोपायं तो परित्रिमरविद्धः ततस्तां तु विजित्य द्रौपदी प्राप्ता च ॥ उक्तिति विस्मयेऽखांडवं दंडस्य वनं ग्रदा
दत्तवानस्मि ॥ खांडव दाहे राज्ञि तेन मयेन कृता च सभा तालब्धा अद्भुतशिल्पि रूपामायायस्पापातेत्र अधरे यागे राजसूये ॥ ८ ॥ अनंतरश्लोकाभि
गीतः तथापि व्याख्यायते ॥ नृप शिरस्सु अंघ्रिर्यस्य तं जरासंधं तवानुजो लीप्सः मखार्थं महत् हतवान् तान् निर्जयं विना राजसूयमखानुपपत्तेः

यत्संश्रयात् द्रुपदगेहमुपागतानां राज्ञां स्वयंवरमुखे स्मरदुर्मदानां ॥ तेजोहृतं खलु मया निहतश्च मत्स्यः सज्जीकृतेन धनु
षाऽधिगता च कृष्णा ॥ ७ ॥ यस्मिन् निरवद्यमुखं खांडवमग्नये दामिडं च मामरगणं तस्माद्विजित्य ॥ लब्धा सभा मय कृताद्भुतशिल्प
मायादिव्या हरन् नृपतयो बलिमध्वरे ते ॥ ८ ॥ यत्तेजसा नृपशिरोंघ्रि महन्मखार्थं आर्यानुजस्तव गंजारासुतस्य च वीर्यवः ॥ तेना
कृताः प्रमथनाथ मखाय तत्पायसो चार्चिस्वदनयन् बलिमध्वरे ते ॥ ९ ॥ पत्न्यास्तवाधिमखन्लकृप्नमहालिषिकस्नाधिषु वारुक
वरं कितवैः सनाथा ॥ स्पृष्टं किकीर्यपदयोः पतिता अमुख्याय स्त्रियोः कृतहतेश्च विमुक्तकेशाः ॥ १० ॥ स्वाध्यायनमः ॥ ॥

गजाह्वसुतस्येव मत्त्वमुत्साह शक्तिः वीर्यं बलं तु यस्य सः ॥ तद्द्वा प्रमथनाथो महाभैरवः तस्य मखाय ये राजानः तेनाहृताः ते युष्मान्मोचिताः ।
तस्मात् ते अध्वरे बलिमानीतवंतः ॥ ९ ॥ येः कितवैर्द्दुःशासनादिभिः तव पत्न्याः कबरं विकीर्य उन्मुच्य स्पृष्टं आकृष्टं तेषां स्त्रियो हतेशाः अत एव
वैधव्यान्मुक्तकेशाः अकृत च कार ॥ कथं तत्तं कवरं ॥ अधिमखं राजसूय मधिकृत्य पन्नकृप्तो रचितो यो महाभिषेकः तेन श्लाघ्यतमं चाससस्याय
स्मरणादिदानीमेव प्राप्तस्य श्रीकृष्णस्य नमनेपदयोः पतितान्यश्रूणि मुखान्यस्याः पत्न्याः ॥ पदशब्दस्यस्यापेक्षस्यापि पतितशब्दस्याक्रपदेनस्य
अधिनाथे सतिवेन्मे दुरखनादि कोपराधन्नाव । मामेवा गोपनिनामि प्राप्तं ॥ १४
मामोनितस्यापोह्नितवात् ॥ १० ॥

दुर्योधनेन।

शिष्याणामयुतमप्यग्रेतत्पक्वान्नंभोक्ष्यःतस्मात्दुर्वाससोहेतोःअरिणारचितंयत्दुरंतंकृच्छ्रंशापलक्षणंतस्मात्सकाशात्नोस्मा
न्वनेपत्युगोप। किंकृत्वाशाकमेवान्नंतस्मिन्पात्रेअवशिष्टंउपभुज्यजग्धमयतउपलालितस्सलिलेविनिमग्नोसुनीनांसंघश्चैलो
कीतृप्ताममंस्त॥ एवंहिभारतकथाकदाचित्दुर्वाससादुर्योधनेनातिथ्येकृतंतेनचपरितुष्टेनवरंवृणीष्वेत्युक्तेदुर्वाससःसशापा
त्पांडवानश्येयुरितिमतम्मिविधायदुर्योधनेनोक्ते॥ युधिष्ठिरास्मत्कुलमुख्योअतस्तस्यापिभवैतवमेवशिष्यायुतसहितेन
तिथिनाभवितव्यंकिंतुद्रौपदीयथाक्षुधशनस्रीदेततथातस्यानुकूलवर्त्यातत्रहगंतव्यमिति॥ ततश्चतथैवदुर्वासास्मिशाप्तेपरमाद

योनोजुगोपवनमेत्यदुरंतकृच्छ्रात्दुर्वाससोऽरिविहितादयुताग्रभुक्यः॥ शाकान्नशिष्टमुपयुज्ययतस्त्रि
लोकींतृप्ताममंस्तसलिलेविनिमग्नसंघः॥११॥ ६०

रेणयुधिष्ठिरेणमाध्याह्निकंकृत्वाआगम्यतामितिविज्ञापितोमुनिसंघोऽघमर्षणायजलेनिममज्ज॥ तत्रचिंतातुरयाद्रौ
पद्यास्मृतमात्रकृष्णः तत्क्षणमेवतत्रकृपयावात्सल्यतयाचागतः॥ तयाचावेदितवृत्तांतोभगवतोक्तं॥ द्रौपदिक्षुधितोऽस्मि॥
